# Mahadeva Stuti by Kuleshvara Pandya

# કુલેશ્વરપાણ્ડ્યકૃતા મહાદેવસ્તુતિઃ

## Document Information

Text title : Mahadeva Stuti by Kuleshvara Pandya

File name : mahAdevastutiHkuleshvarapANDya.itx

Category : shiva, stuti

Location : doc_shiva

Proofread by : Rajesh Thyagarajan

Description/comments : Minakshi stutimanjari and Halasya Mahatmyam edited by by SV Radhakrishna Sastri

Latest update : May 20, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 23, 2023

*sanskritdocuments.org*

# કુલેશ્વરપાણ્ડ્યકૃતા મહાદેવસ્તુતિઃ

કુલેશ્વરઃ-

મહાનીપારણ્યાન્તરકનકપદ્માકરતટી
　મહેન્દ્રાનીતાષ્ટદ્વિપધૃતવિમાનોદવસિતમ્ ।
મહાલીલાભૂતિપ્રકટિતવિશિષ્ટાત્મવિભવં
　મહાદેવં વન્દે મધુરશફરાક્ષીસહચરમ્ ॥ ૧॥

મહામાતઙ્ગાસૃગ્ધરવસનમદ્રીન્દ્રતનયા-
　મહાભાગ્યં મત્તાન્ધકકરટિકણ્ઠીરવવરમ્ ।
મહાભોગીન્દ્રોદ્યત્ફણમણિગણાલઙ્કૃતતનું
　મહાદેવં વન્દે મધુર શફરાક્ષીસહચરમ્ ॥ ૨॥

મહાદુગ્ધામ્ભોધૌ મથન જવ સમ્ભૂતમસિતં
　મહાહાલં કણ્ઠે સકલભયભઙ્ગાય દધતમ્ ।
મહાકારુણ્યાબ્ધિં મધુમથનદૃગ્દૂરચરણં
　મહાદેવં વન્દે મધુર શફરાક્ષીસહચરમ્ ॥ ૩॥

નમન્નાલીકામ્બુજભવશુનાસીરમકુટી-
　લસન્માણિક્યાંશુસ્ફુરદરુણપાદાબ્જયુગલમ્ ।
અમન્દાનન્દાબ્ધિં હરિનયનપદ્માર્ચિતપદં
　મહાદેવં વન્દે મધુર શફરાક્ષીસહચરમ્ ॥ ૪॥

સમીરાહારેન્દ્રાઙ્ગદમખિલલોકૈકજનકં
　સમીરાહારાત્મપ્રવણજનહૃત્પદ્મનિલયમ્ ।
સુમીનાક્ષીવક્ત્રામ્બુજતરુણસૂર્યં સુમનસં
　મહાદેવં વન્દે મધુરશફરાક્ષી સહચરમ્ ॥ ૫॥

નતાઘૌઘારણ્યાનલમનિલભુઙ્નાથવલયં
　સુધાંશોરર્ધાંશં શિરસિ દધતં જહ્નુસુતયા ।
વદાન્યાનામાદ્યં વરવિબુધવન્દ્યં વરગુણં

મહાદેવં વન્દે મધુર શફરાક્ષીસહચરમ્ ॥ ૬॥

દશાસ્યાહઙ્કારદ્રુમકુલિશિતાઙ્ગુષ્ઠનખરં
નિશાનાથશ્રીજિન્નિજવદનબિમ્બં નિરવધિમ્ ।
વિશાલાક્ષં વિશ્વપ્રભવભરણાપાયકરણં
મહાદેવં વન્દે મધુર શફરાક્ષીસહચરમ્ ॥ ૭॥

અનાકારં હારીકૃતભુજગરાજં પુરહરં
સનાથં શર્વાણ્યા સરસિરુહપત્રાયતદૃશમ્ ।
દિનારમ્ભાદિત્યાયુતશતનિભાનન્દવપુષં
મહાદેવં વન્દે મધુરશફરાક્ષી સહચરમ્ ॥ ૮॥

ઉમાપીનોત્તુઙ્ગસ્તનતટલસત્કુઙ્કુમરજસ્-
સમાહારાત્યન્તારુણવિપુલદોરન્તરતલમ્ ।
રમાવાણીન્દ્રાણીરતિવિરચિતારાધનવિધિં
મહાદેવં વન્દે મધુર શફરાક્ષીસહચરમ્ ॥ ૯॥

ધરાપાથસ્સ્વાહાસહચરજગત્પ્રાણશશભૃત્
સુરાધ્વાહર્નાથાધ્વરકરશરીરં શશિધરમ્ ।
સુરાહારાસ્વાદાતિશયિનિજવાચં સુખકરં
મહાદેવં વન્દે મધુરશફરાક્ષી સહચરમ્ ॥ ૧૦॥

ધરાપીઠં ધારાધરકલશમાકાશવપુષં
ધરાભૃદ્દોર્દણ્ડં તપનશશિવૈશ્વાનરદૃશમ્ ।
વિરાજન્નક્ષત્રપ્રસવમુદરીભૂતજલધિં
મહાદેવં વન્દે મધુરશફરાક્ષીસહચરમ્ ॥ ૧૧॥

સુપર્ણાકાઙ્ક્ષામ્ભોજાસનદૃગતિદૂરાઙ્ઘ્રિશિરસં
સુપર્ણાહારસ્રક્સુરવિટપિ શાખાયતભુજમ્ ।
અપર્ણાપાદાબ્જાતિચલિત ચન્દ્રાર્દ્ધમકુટં
મહાદેવં વન્દે મધુર શફરાક્ષીસહચરમ્ ॥ ૧૨॥

મખારાતિં મન્દસ્મિતમધુરબિમ્બાધરલસન્-
મુખામ્ભોજં મુગ્ધામૃતકિરણચૂડામણિધરમ્ ।
નખાકૃષ્ટેભત્વક્પરિવૃતશરીરં પશુપતિં
મહાદેવં વન્દે મધુર શફરાક્ષીસહચરમ્ ॥ ૧૩॥

સહસ્રાબ્જૈકોને નિજનયનમુદ્ધૃત્ય યજતે
    સહસ્રાખ્યાપૂર્ત્યૈ સરસિજદૃશે યેન કૃપયા ।
સહસ્રારં દત્તં તપનનિયુતાભં રથપદં
    મહાદેવં વન્દે મધુર શફરાક્ષીસહચરમ્ ॥ ૧૪॥

રથાવન્યામ્નાયાશ્વમજરથકારં રણપટું
    રથાઙ્ગાદિત્યેન્દું રથપદધરાસ્રં રથિવરમ્ ।
રથાધારેષ્વાસં રથધરગુણં રમ્યફલદં
    મહાદેવં વન્દે મધુર શફરાક્ષીસહચરમ્ ॥ ૧૫॥

ધરાકર્ષાપાસ્ત પ્રચુરભુજકણ્ડૂયનજલ-
    ન્ધરાહાર્યદ્વૈધીકરણહૃત લોકત્રયભયમ્ ।
સ્મરાકારાહારાકલનપટુફાલાનલકણં
    મહાદેવં વન્દે મધુરશફરાક્ષીસહચરમ્ ॥ ૧૬॥

અગસ્ત્યઃ-
ઇદં સુન્દરનાથસ્ય સ્તોત્રં ભક્ત્યા પઠન્તિ યે ।
શ્રિયા પરમયા યુક્તાઃ શિવમન્તે ભજન્તિ તે ॥ ૧૭॥

સુન્દરેશ્વરમીશાનં સુમીનાક્ષીસુનાયકમ્ ।
કુલેશ્વરમહીપાલ ઇતિ સ્તોત્રૈરતોષયત્ ॥ ૧૮॥

અથ વાચાऽશરીરિણ્યા શઙ્કરસ્સુન્દરેશ્વરઃ ।
સ્તોત્રપ્રિયઃ પ્રિયાદાહ ભૂપતિં પુરતઃ સ્થિતમ્ ॥ ૧૯॥

ઇતિ કુલેશપાણ્ડ્યકૃતા સ્તુતિઃ સમાપ્તા ।
શ્રીસ્કાન્દે મહાપુરાણે અગસ્ત્યસંહિતાયાં
હાલાસ્યમાહાત્મ્યે અધ્યાયઃ -૬૨ -લીલા -૫૬ શ્લોકાનિ ૪૮-૬૩
(શિવલીલાર્ણવતઃ)

Proofread by Rajesh Thyagarajan

*Mahadeva Stuti by Kuleshvara Pandya*

pdf was typeset on May 23, 2023

Please send corrections to *sanskrit@cheerful.com*